BIHAR SHODH SAMAAGAM
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
issn : 3048-6971
Vol. 3, Issue 2, April-June, 2025
Available online : https://www.biharshodhsamaagam.com/

# लाघवत्व-गौरवत्वविषये पाणिनि-कातन्त्रव्याकरणस्य कृदन्तप्रकरणम्

BIDYUT KR BARMAN
RESEARCH SCHOLAR
RAIGANJ UNIVERSITY

## उपोद्घातः

संस्कृतव्याकरणं केवलं शब्दार्थबोधरूपप्रकृतिप्रत्ययान्न व्यवह्रियते। वैयाकरणानां मतानुसारेण मुक्तिप्राप्तेः मूलमार्गरूपेणव्याकरणं प्रतिभाति। मुक्तिप्राप्त्यर्थं लोकसमाजे विविधानां यागानां प्रचलनं दरीदृश्यते। यागे यथार्थमेव मन्त्रम् उच्चारयेत्। अपि च शुद्धमन्त्रोच्चारणार्थं व्याकरणस्य ज्ञानम् आवश्यकं वर्तते। व्याकरणेनैव साधुशब्दस्य प्रयोगः सम्भवति। अस्मिन् प्रसङ्गे महाभाष्यकारेणोक्तम्– '**रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति**।' व्याकरणम् एकं महत् दार्शनिकशास्त्रमिति वक्तुं शक्यते। कारणं हि दर्शनशास्त्रस्य सर्वाणि लक्षणानि व्याकरणशास्त्रे उपलभ्यन्ते। अस्मिन् प्रसङ्गे माधवाचार्यः तस्य 'सर्वदर्शनसंग्रहः' इति ग्रन्थे पाणिनि-व्याकरणं '**पाणिनिदर्शनम्**' इति उक्तवान्।

पाणिनिपूर्ववर्तिनःबहवो वैयाकरणाः व्याकरणग्रन्थान् रचितवन्तः। किन्तु सम्प्रति पाणिनीयव्याकरणम् उज्ज्वलनक्षत्रमिव विराजते। पाणिनिः केवलं वैदिकशब्दस्य अर्थबोधनाय व्याकरणं न रचितवान्, अर्थात् लौकिकशब्दस्यार्थबोधनाय अपि व्याकरणग्रन्थं विरचितवान्। केषां शब्दानामनुशासनं भवितुमर्हति अस्मिन् प्रसङ्गे महाभाष्यकारेण भाष्यग्रन्थे कथितं - '**लौकिकानां वैदिकानाञ्च**।' इति। किन्तु शर्ववर्मा केवलं लौकिकशब्दसिद्ध्यर्थं व्याकरणग्रन्थमरचितवान्। शर्ववर्मना कृतः व्याकरणग्रन्थो भवति '**कातन्त्रव्याकरणम्**'। कातन्त्रव्याकरणस्यसूत्रसंख्या पाणिनिव्याकरणात् अतीव लघुः वर्तते। पाणिनि बहुभिः सूत्रैः यत् प्रकाशयति शर्ववर्मा अल्पमेव सूत्रेण तत् प्रकाशयति

## • लाघवत्वं गौरवत्वञ्च बिषये पाणिनि-कातन्त्रव्याकरणस्य कृदन्तप्रकरणम्

पाणिनीयव्याकरणात् कातन्त्रव्याकरणे सूत्रप्रयोगे कुत्रापि समानता, कुत्रापि नवीनता च दृश्यते। यथा- देयम्, धेयम्, स्वेयम् चेत्यादिपदसिद्ध्यर्थं कातन्त्रकारः एकैणैव सूत्रेण य इति प्रत्ययस्य प्रयोगेन, इकारादेशेन लाघवं दर्शयति। किन्तु पाणिनिनाकृते यत् इति प्रत्ययेतथा आकारस्य इकारादेशे गौरवं सूच्यते। शक्यम्, सह्यम् इति पदसिद्ध्यर्थमुभयत्र य इति प्रत्ययस्य प्रयोगे समानता दृश्यते। ईषत्प्रलम्भः, सुप्रलम्भः दुष्प्रलम्भः चेत्यादिरूपसिद्ध्यर्थं मकारागमः अपि उभयत्र दृश्यते। कातन्त्रव्याकरणे मकारागम एकेणैव सूत्रेण सरलतयाप्रदर्श्यते। किन्तु पाणिनीयव्याकरणे नुमागमार्थं सूत्रद्वयस्य आवश्यकतास्ति। अत्राशयः कातन्त्रव्याकरणापेक्षया पाणिनीयव्याकरणंकठिनमिति प्रतीतिर्भवति। द्युतितम्, द्योतितमित्यादिरूपसिद्ध्यर्थं वैकल्पिकं गुणविधानमुभयत्र दृश्यते। अत्र पाणिनीयव्याकरणात् कातन्त्रव्याकरणस्य लाघवमभवत्। यद्यपि पाणिनीयव्याकरणात् कातन्त्रव्याकरणमाकारेण लघु तथापि पाणिनीयव्याकरणात् कातन्त्रव्याकरणस्य शब्दार्थबोधो झटिति भवतीति।

'ऋदुपधाच्चाक्लृपिचृते'इति एकेणैवसूत्रेण पाणिनीयव्याकरणकारेण, अपि च कातन्त्रीयव्याकरणकारेण वृत्तम्, वृद्धम् इति पदसाधनंक्रियते। पाणिनिव्याकरणानुसारम् ऋकारोपधायुक्तधातूनां 'क्यप्'-प्रत्ययो भवति। अत्र 'वृत् वर्तने' इति धातुः, अनुबन्धलोपे केवलम् 'ऋ' उपधावस्थायामेव तिष्ठति। तदनन्तरं वृत् इति धातोः 'ऋदुपधाच्चाक्लृपिचृते' इति सूत्रेण 'क्यप्'-प्रत्यये वृत्य अवतिष्ठते। अत्र ककार इत् भवति इति हेतोः 'क्ङिति च' इति सूत्रेण लघुपधगुणस्य निषेधो भवति। अतः प्रातिपदिकसंज्ञायां स्वादिकार्येण 'वृत्यम्'इति पदं सिद्ध्यति। वृद्धमपि तथैव। कातन्त्रव्याकरणेऽपि अनेन सूत्रेण अयं नियमः स्वीक्रियते। अर्थात् उभयत्र समानता अस्ति।

ब्रह्मोद्यम्, ब्रह्मवद्यम् इत्यादि पदानां सिद्ध्यर्थं 'क्यप्'-प्रत्ययस्य विधानम् उभयत्र दृश्यते। 'वदः सुपि क्यप् च' इति सुत्रेण आचार्यपाणिनिना ब्रह्मोद्यम्, ब्रह्मवद्यम् इत्यादिपदानां सिद्धिः क्रियते। अर्थात् यत्र उपसर्गेण विना 'सुप्' उपपदं भवति, तत्र 'वद्' धातोः भावार्थे 'क्यप्'-प्रत्ययो भवति। अपि च चकारसामर्थ्यात् 'यत्'-प्रत्ययोऽपिभवति।'ब्रह्मणो वदनम्' इति विग्रहे ब्रह्मअम्वद्



@2025 Bihar Shodh Samaagam

तिष्ठति। तदनन्तरं 'वदः सुपि क्यप् च' इति सूत्रेण 'क्यप्'-प्रत्यये अनुबन्धलोपे केवलं'य'कारः अवतिष्ठति। ततः 'वचिस्वपियजादीनां किति' इति सूत्रेण सम्प्रसारणम्, अपि च 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूप-एकादेशे उद्य इति भवति। अत्र ब्रह्मन् इति शब्देन सह 'उपपदमतिङ्' इति सूत्रानुसारेण समासेन,प्रातिपदिकसंज्ञायां सुपो लुक् भवति। प्रातिपदिकान्तस्य नकारस्य 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन सूत्रेण लोपे ब्रह्म उद्य भवति। तदनन्तरं स्वादिकार्येण ब्रह्मोद्यम् इति पदं सिद्धं भवति। अत्र 'यत्'-प्रत्ययोऽपि विहितः अस्ति इतिहेतोः सम्प्रसारणं न भवति, केवलं अच्-प्रत्ययेन रूपसिद्धिः भवति, अतः अत्र'अच्'-प्रत्ययेनब्रह्मवद्यम् इति रूपं भवति।

अपरस्यां दिशि कातन्त्रकारेण सत्योद्यम्, सत्यवद्यम् इति पदानां सिद्ध्यर्थं 'नाम्नि वदः क्यप् च' इति सूत्रस्य प्रयोगः कृतः। अत्र 'यमिमदिचरिगदां त्वनुपसर्गे' इति सूत्रात् 'अनुपसर्गः' इति पदस्य अनुवृत्तिः भवति। अत्र अनुपसर्गः नाम्नि उपपदम्, तद्हेतोः 'वद्' इति धातोअनन्तरं 'य' प्रत्ययः, अपि च 'क्यप्'-प्रत्ययो भवति।

सत्योद्यम्, सत्यवद्यम् इति पदसाधनार्थं 'वद् व्यक्तायां वाचि' धातुः प्रयुज्यते। सत्यं वदितव्यम् इत्यर्थे 'य'-प्रत्यये सत्यवदनम्, अपि च 'क्यप्'-प्रत्यये वकारस्य सम्प्रसारणम्, एवं गुणे सत्योद्यम् इति पदं सिद्धं भवति। अतः पाणिनीयव्याकरणे तथा कातन्त्रव्याकरणे इत्थं पदसाधनार्थम् उभयत्र समानता अस्ति।

पाणिनीयव्याकरणेन तथा कातन्त्रव्याकरणेन ब्रह्मभुयम्, देवभुयम् इत्यादि पदं 'क्यप्' इति प्रत्ययेन सिद्धं भवति। 'भुवो भावे' इति सूत्रेण आचार्यपाणिनिना एतत्पदसिद्धिः क्रियते। अर्थात् उपसर्गभिन्नं सुबन्तम् उपपदं भवति चेत्'भू'-धातोः अनन्तरं भावार्थे 'क्यप्'-प्रत्ययो भवति। 'ब्रह्म' इति पदस्य 'भुवो भावे' इति सूत्रेण क्यप्-प्रत्ययो विधीयते, अत्रापि ककार इत् भवति इतिहेतोः 'क्ङिति च' इति सूत्रानुसारेण गुणनिषेधो भवति। तदनन्तरंउपपदसमासः, लुक् भवति, अपि च नकार-लोपेब्रह्मभुय इति। ततः प्रातिपदिकसंज्ञायां स्वादिकार्येण च ब्रह्मभुयम् इति पदं सिद्धं भवति। कातन्त्रव्याकरणेऽपि 'भावे भुवः' इति सूत्रेण'क्यप्'-प्रत्ययो भवति। अनुपसर्ग नाम्नि उपपदार्थं भुप्राप्तौ धातोः अनन्तरं 'क्यप्'-प्रत्ययो भवति। ब्रह्मणो भवनं ब्रह्मभुयं गतः। अत्र वक्तुं शक्यते यत् ब्रह्मभुयम् इति पदसिद्ध्यर्थम् उभयत्र समानता अस्ति।

पाणिनीयव्याकरणे तथा कातन्त्रव्याकरणे 'हनस्त च' इति सूत्रस्य समव्यवहारो दृश्यते। कातन्त्रकारानुसारेण 'हन् हिंसागतौ' धातोःअनन्तरं भावार्थे 'क्यप्'-प्रत्ययो भवति। 'शुनः हननं श्वहत्या, बृषलस्य हननं बृषलहत्या'। अत्र 'क्यप्' प्रत्ययो भवति इतिहेतोः प्रकृतसूत्रेण नकारस्य तकारादेशो भवति। अपि च पाणिनीयव्याकरणे 'हन्' धातोः भावार्थे 'क्यप्' प्रत्ययो भवति। एवं च धातोः परवर्तिनः तकारस्य अन्ते आदेशो भवति। ब्रह्मन् इति पदेन सह 'हन्' धातोः अनन्तरं'हनस्त च' इति सूत्रेण 'क्यप्' प्रत्ययः तथा तकारस्य अन्तादेशो भवति। तदनन्तरम् उपपदसमासे प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति सूत्रेण सुप्लुकि, 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नकारस्य लोपे ब्रह्महत्य भवति। किन्तु ब्रह्महत्य इति पदं लोकव्यवहारे स्त्रीलिङ्गे प्रयुक्तं भवति। वस्तुतः 'अजाद्यतस्टाप्' इति सूत्रेण'टाप्'-प्रत्यये स्ववर्णदीर्घे ब्रह्महत्या इति पदं सिद्धं भवति।

पाणिनीयव्याकरणे 'एतिस्तुशास्वृदृजुष क्यप्' इति सूत्रेण इण्, स्तु, वृ, दृ जुष् इत्येतेषां धातूनां 'क्यप्'-प्रत्ययो भवति। अपि च कातन्त्रव्याकरणे 'वृदृजुषीणशास्तुगुहां क्यप्' इति सूत्रानुसारेण वृञ् वरणे, दृञ् आदरे, जुषी प्रीतिसेवनयोः, इण् गतौ, शासु अनुशिष्टौ, गुहु संवरणे धातूनां'क्यप्'-प्रत्ययो भवति। 'इण्स्तुभ्यां स्वरादयः' इत्यस्मात्'य'-इति प्रत्ययस्य प्राप्तिर्भवति तथा 'ऋवर्णव्यञ्जनान्ताद् घ्यण्' इति सूत्रेण 'घ्यण्'-प्रत्ययस्यापि प्राप्तिर्भवति, इतिहेतोः केवलं प्रकृतसूत्रेण अर्थात् 'वृदृजुषीणशास्तुगुहां क्यप्' इति सूत्रेण 'क्यप्'-प्रत्ययस्यविधानंभवति। अनेन प्रकारेण कातन्त्रकारेण इत्यः, स्तुत्यः इत्येतेषां पदानां सिद्धिः क्रियते। किन्तु आचार्यपाणिनिः एतत्पदसिद्ध्यर्थम् एकम् अधिकं सूत्रम् प्रयुङ्क्ते अर्थात् 'ह्रस्वस्य पिति कृति तुक्' इति सूत्रस्य व्यवहारं करोति।

कातन्त्रव्याकरणे 'शस्निदुहिगुहिभ्यो वा क्यप् वक्तव्य' इति वचनस्य प्रचलनम् अस्ति। अनेन अत्र 'यत्'-प्रत्ययस्यापि प्राप्तिर्भवति। अत्र 'यत्'-प्रत्ययेन शस्यम्-शंस्यम्, दुह्यम्-दुह्योम्, गुह्यम्-गुह्योम् इत्यादि रूपं भवति । किन्तु पाणिनीयव्याकरणे 'शंसिदुहिगुहिभ्यो वा' (इति वक्तव्यम्) अस्य प्रयोगो न दृश्यते। केवलं प्रयोजनवशाद् वाक्यमिदं व्यवह्रियते। अस्य वार्तिकस्य अर्थो भवति शंस, दुह्, गुह् इति धातूनां विकल्पेन'क्यप्'- प्रत्ययो भवति। यत्र 'क्यप्'-प्रत्ययं न भवति तत्र विकल्पे 'ऋहलोर्ण्यत्'

इति सूत्रेण 'ण्यत्'-प्रत्ययो भवति। यथा शस्यम्-शंस्यम्, दुह्यम्-दोह्यम्। अर्थात् अत्र पाणिनीयव्याकरणस्यापेक्षया कातन्त्रव्याकरणे गौरवं दृश्यते।

कातन्त्रव्याकरणे तथा पाणिनीयव्याकरणे उभयत्र 'ऋदुपधाच्चाक्लृपिचृतेः' इति अस्य सूत्रस्य प्रयोगो दृश्यते। अस्य सूत्रस्य उभयत्र समानार्थे प्रयोगो भवति। अर्थात् 'ऋदुपधाच्चाक्लृपिचृतेः' इति सूत्रानुसारेण ऋकारस्यउपधावस्थायामेव धातुना 'क्यप्'-प्रत्ययस्य प्रयोगो भवति। किन्तु 'क्लृपि' एवं 'चृति' धातुः यदि तिष्ठति तर्हि 'क्यप्'-प्रत्ययस्य प्रयोगो न भवति। यथा 'वृतु वर्त्तने' धातुना 'क्यप्'-प्रत्यये वृत्तम्। तथैव पाणिनीयव्याकरणे ऋकारस्य उपधावस्थायामेव धातुना 'क्यप्'-प्रत्ययो भवति क्लृप् तथा चृत् धातू विहाय। यथा वृतु वर्तने इति धातोः अनुबन्धलोपे ऋकार उपधावस्थायां तिष्ठति। इत्थमवस्थायामेव 'क्ङिति च' इति सूत्रेण गुणनिषेधो भवति। ततः प्रातिपदिकसंज्ञायां स्वादिकार्येण वृत्यम् इति पदसिद्धं भवति। तथैव बृद्धम् इति।

किन्तु कातन्त्रव्याकरणे 'अक्लृपिचृते'इति निषेधवचनेन 'शकिसहिपवर्गान्ताच्च' इति सूत्रेण 'यत्'-प्रत्यये 'क्लृपु समर्थे' धातुना कल्प्यम् इति पदं भवति। अपि च 'चृति हिंसायाम्' धातुना 'ऋवर्णव्यञ्जनान्ताद् घ्यण्' इति सूत्रानुसारेण'घ्यण्'-प्रत्ययेन'क्यप्'-निषेधो भवति, एवं च चर्त्यम् इति पदं सिद्धं भवति। तथैव पाणिनीयव्याकरणे 'क्लृपिचृत्योस्तु' इति निषेधवचनेन 'क्यप्'-प्रत्ययस्य निषेधे कल्प्यम्, चर्त्यम् भवति। प्रकृतसूत्रम् अर्थात् 'ऋदुपधाच्चक्लृपिचृते' इति सूत्रेण 'क्लृप्' एवं 'चृत्' इति प्रत्ययोनिषेधं भवति। अतः हलन्तपक्षे 'ण्यत्'-प्रत्ययेन 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'पुगन्तलघुपधस्य च' सूत्रेण लघुपधगुणो रपरत्वञ्च भवति। लृकारस्य लपरत्वे कल्प्यम् इति पदं सिद्धं भवति। किन्तु ऋकारस्य गुणे 'अर्' इतिरपरत्वे चर्त्यम् इति पदं सिद्धं भवति। अत्र यद्यपि समानता वर्तते तथापि पाणिनीयव्याकरणस्यापेक्षया कातन्त्रव्याकरणे गौरवं दृश्यते।

'भृञोऽसंज्ञायाम्' इति सूत्रम् उभयव्याकरणयोः प्राप्यते। उभयत्र 'भृ'-धातोःअनन्तरं'क्यप्'-प्रत्ययो भवति। कातन्त्रव्याकरणानुसारेण 'भृञोऽसंज्ञायाम्' इति सूत्रेण संज्ञाभिन्नेविषये 'भृञ्'-धातोः अनन्तरं 'क्यप्'-प्रत्ययो भवति। भ्रियते इति भृत्यः। अत्र 'क्यप्'-प्रत्ययः अन्ते अस्ति इतिहेतोः तकारागमे भृत्यः इति रूपं सम्भवति। अपि च पाणिनीयव्याकरणे असंज्ञा इति पदेन भृ-धातोः 'क्यप्' प्रत्ययो भवति। भृ-धातोः अनन्तरं 'भृञोऽसंज्ञायाम्' इति सूत्रेण 'क्यप्' इति प्रत्ययस्यप्राप्तिः, ततः अनुबन्धलोपे, 'ह्रस्वस्य पिति कृति तुक्' इति सूत्रेण तुगागमे अनुबन्धलोपेभृत्य इति। ततः प्रातिपदिकसंज्ञायां स्वादिकार्येण प्रथमवचने भृत्यः, द्वितीये बहुवचने च भृत्यौ, भृत्याः रूपसिद्धिः भवति।

असंज्ञायाम् इति कथनेन भार्या इति नाम्नी क्षत्रिया इत्यत्र बधुसंज्ञां प्राप्यते, इतिहेतो अत्र 'क्यप्'-प्रत्ययो न भवति। किन्तु 'ऋवर्णव्यञ्जनान्ताद् घ्यण्' इति सूत्रेण 'घ्यण्'-प्रत्ययस्य प्राप्तिस्तथा ऋकारस्य बृद्धिः भवति। अतः भार्या इति नाम्नी क्षत्रि इत्यत्र भावार्थे एवं च भार्या बधु इत्यत्र कर्मार्थे प्रत्ययो भवति। किन्तु पाणिनीयव्याकरणे असंज्ञायाम् इति पदस्यप्रयोजनम् एतादृशं न भवति, भार्या इति पदं क्षत्रिया इति पदस्य समानम्। अतः अत्र'क्यप्' न भवति, अत्र ण्यत्प्रत्ययो भवति, आदिवृद्धौ भार्या इति पदं सिद्धं भवति।

'भिद्योद्ध्यौ नदे'इति सूत्रस्य प्रयोग उभयव्याकरणयोःप्राप्यते। अत्र 'भिद्'-धातोः 'उज्झ'-धातोश्च अनन्तरं निपातनः 'क्यप्'-प्रत्ययोभवति। एवं नद्यार्थकस्य 'उज्झ' इति धातोः झकारस्थाने धकारादेशो भवति। यथा- भिदिर् विदारणे इति धातोः 'भिद्योद्ध्यौ नदे' इति सूत्रानुसारेण 'क्यप्'-प्रत्ययः, अपि च निपातने भिद्य भवति। तदनन्तरं प्रातिपदिकसंज्ञायां स्वादिकार्येण भिद्यः इति पदं सिद्धं भवति। अत्र नद इति पुंलिङ्गे, अतः विशेषणमपि पुंलिङ्गि भवति। अपरत्र च कातन्त्रकारोऽपि तस्य कातन्त्रव्याकरणे अस्य सूत्रस्य प्रयोगं कृतवान् गमनार्थकनद्यार्थे।'सूर्यरुच्याऽव्यथ्याः' इति सूत्रात् कर्त्तरि इति पदस्य अनुवृत्तिः भवति।'भिनत्ति कुलमिति भिद्योःनदः'। अत्र 'भिद्योद्ध्यौ नदे' इति सूत्रानुसारेण'क्यप्'-प्रत्यये कर्त्रर्थे 'भिदिर् विदारणे' इति धातोःनिपातने इदं पदं सिद्धं भवति। अतः वक्तुं शक्यते यत् पाणिनीयव्याकरणे तथा कातन्त्रव्याकरणे अस्मिन् विषये समानता अस्ति।

राप्यम्, त्राप्यम्, लाप्यम् इति पदानां सिद्ध्यर्थम् आचार्यशर्ववर्मणः कातन्त्रव्याकरणस्य 'ऋवर्णव्यञ्जनान्ताद् घ्यण्' इति सूत्रात्'घ्यण्' इति प्रत्ययस्य अनुवृत्तिः भवति। अत्र 'आङ्' इति पदेन सह 'सुनति' इति पदस्य सम्बन्धः अस्ति। अस्मात् कारणात् रप्, लभ् व्यक्तायां वाचि, त्रपुष् लज्जायाम्, चुम् अदने धातूनां 'घ्यण्' प्रत्ययस्य प्राप्तिर्भवति। अपि च 'सु', 'यु' इति धातुद्वयस्य अनन्तरं 'स्वराद् यः' इति सूत्रेण 'य'-प्रत्ययो भवति। तत एव 'घ्यण्'-प्रत्ययस्य विधानं भवति। यथा 'आसुयुवपरिपिलपित्रपिदभिचमीनाञ्च' इत्यनेन सूत्रेण 'घ्यण्'-प्रत्यये इदं पदं सिद्धं भवति।

अपरत्र आचार्यः पाणिनिःएतत्पदसाधनार्थं 'आसुयुवपरिपित्रपिचमश्च' इति सूत्रस्य प्रयोगं कृतवान्। अनेन सूत्रेण आङ्-पूर्वकानां वष्, रप्, त्रप्, चुम् इति धातूनां तथा सु, यु इति धातुद्वयस्य 'ण्यत्'-प्रत्ययो भवति। अत्र 'रप् व्याक्तायां वाचि' इति धातुः। अतः 'रप्' इति धातोः अनन्तरं 'आसुयुवपरिपित्रपिचमश्च' इति सूत्रेण 'ण्यत्'-प्रत्ययो भवति। तदनन्तरम् उपधावृद्धिः, तेन राप्य भवति। अथ प्रातिपदिकसंज्ञायां स्वादिकार्येण राप्यम् इति पदं सिद्धं भवति। त्राप्यम्, चाम्यम् अपि तथैव। अर्थात् उपर्युक्तानां पदानां साधने पाणिनीयव्याकरणे तथाकातन्त्रव्याकरणे, उभयत्रैव समानता अस्ति।

सुग्लः इति पदस्य साधनार्थं पाणिनीयव्याकरणस्य सूत्रं भवति 'आतश्चोपसर्गे' इति। अनेन सूत्रेण 'क'-प्रत्ययो भवति आकारान्तधातुभ्यः उपसर्गे उपपदे विद्यमाने सति। अत्र सु इति उपसर्गः ग्लै इति धातोः उपपदे विद्यमानः, अतः अस्य सूत्रस्य प्राप्तिः। 'आदेच उपदेशेऽशिति' इत्यनेन सूत्रेण ऐ-कारस्थाने आ-कारादेशो भवति, तेन सु ग्ला भवति। तदनन्तरम् 'आतश्चोपसर्गे' इति सूत्रेण 'क'-प्रत्यये,अनुवन्धलोपे अ इति अवतिष्ठति। ततः 'आतो लोप इटि च' इत्यनेन धातोः आकारलोपे सु ग्ल अ भवति, अथ 'गतिकारोपपदानां कृद्भिः सहः समासनचनं प्राक्सुबुत्पत्तेः' इति नियमानुसारेण स्वादि प्रत्ययस्य पूर्वे अपि च समासेन स्वादिकार्येण च सुग्लः इति पदसिद्धं भवति।

किन्तु सुग्लः इति पदसाधनार्थं कातन्त्रव्याकरणस्य सुत्रं भवति 'उपसर्गे त्वातो डः' इति। अर्थात् कर्त्रर्थे 'ड'-प्रत्ययो भवति यदा आकारान्तधातोःउपपदे उपसर्गस्तिष्ठति। 'सुष्ठु ग्लायते इति सुग्लः', ग्लै हर्षक्षये धातोरनन्तरम् ऐ-कारस्थाने आत् इति आदेशो भवति, अनुबन्धलोपे केवलम् आ इति तिष्ठति। अतः धातुः आकारान्त अस्ति। तदनन्तरं 'ड'-प्रत्यये डित्त्वसामर्थे आकारस्य लोपे सुग्लः इति। कातन्त्रकारानुसारेण यद्यपि अत्र 'क'-प्रत्ययस्य अनुवृत्तिः सम्भवति तथापि 'ड'-प्रत्ययस्यैव प्रयोगोविधेयः। कारणं भवति अत्र 'ड'-प्रत्ययप्रयोगेण सम्प्रसारणस्य अभावो दृश्यते। कातन्त्रकारानुसारेण यदि अत्र 'क'-प्रत्ययस्य प्रयोगो भवति तर्हि अन्यः अपिदोषः दृश्यते। यथा त्रि ष्वप् शये, वच् परिभाषणे चेति धातोरनन्तरं सम्प्रसारणे उव आदेशे आहुवः, प्रहुवः इत्यादीनांरूपाणाम् अनिष्टापत्तिर्भवेत्।

सुग्लः इति पदसाधने उभयव्याकरणे पार्थक्यं दृश्यते। अत्र आचार्यपाणिनिनाप्रत्यक्षरूपेण 'क'-प्रत्ययस्य प्रयोगः क्रियते, किन्तु आचार्यशर्ववर्मा 'ड'-प्रत्ययस्य प्रयोगं कृत्वा लाघवं दर्शयति।

पिवः, जिघ्रः, धमः, धयः इत्यादि पदसाधनार्थं पानिणीयव्याकरणस्य सूत्रं भवति 'पाघ्राध्माधेड्दृशः शः' इति। अर्थात् पा, घ्रा, ध्मा, धेट् तथा दृश् इति धातुभ्यः कर्त्रर्थे 'श'-प्रत्ययो भवति। अत्र शकारस्य 'लशक्वतद्धिते' इति सूत्रानुसारेण इत्संज्ञा भवति,अनुबन्धलोपे केवलम् अ इति तिष्ठति। शकार इत् भवति इति कारणात् 'तिङ्शित्सार्वधातुकम्' इत्यनेन सूत्रेण सार्वधातुकसंज्ञायां शबादिकार्यं भवति। अपित्-सार्वधातुकत्वात् 'क्ङिति च' सूत्रानुसारेण गुणो वृद्धिश्च न भवति। प्रकृतेन अनेन सूत्रेण 'श'-प्रत्ययस्य अनुवृत्तिः भवति। यथा पा पाने इति धातोः अनन्तरं 'पाघ्राध्माधेड्दृशः शः' इति सूत्रेण 'श'-प्रत्ययः भवति, अपि च अनुबन्धलोपे पा अ तिष्ठति। अतः अकारस्य सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इत्यनेन शबागमे, अनुबन्धलोपे पा अ अ तिष्ठति। ततः 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इत्यनेन अदन्त-पिबादेशः भवति, एवं च 'अतो गिणे' इति सूत्रेण पररूप-एकादेशे पिब इति भवति। तदनन्तरं प्रातिपदिकसंज्ञायां स्वादिकार्येण पिबः इति पदं सिद्धं भवति। एकेनैव समानेन नियमेन जिघ्रः, धमः इत्येतेषां पदानां साधनं भवति।

कातन्त्रकारोऽपि कथयति 'धेट्- दृशि-पा-घ्रा-ध्मः शङ्' इति सूत्रानुसारेण धेट् पाने, दृशिर् प्रेक्षणे, घ्रा गन्धोपादने, ध्मा शब्देइति एतेषां पाणिनीयसमानार्थानांधातूनामनन्तरं 'शङ्'-प्रत्ययो भवति, यदा उपसर्ग उपपदे तिष्ठति। यथा उद्धायः,उत्पश्यः, उदध्मः उजिघ्रः इत्येवम्। अत्र सार्वधातुकसंज्ञायां'शङ्'-प्रत्ययस्य अनन्तरं अन्-विकरणे,'दृशिर्' इत्यस्य स्थाने 'पश्य' आदेशो भवति। अतः वक्तुं शक्यते यत् उभयत्र समानता अस्ति।

यथा वा, 'विद चेतनाख्याननिवासेषु' इति धातोः स्वार्थिक'णिच्'-प्रत्यये, गुणे वेदिइति भवति। तदनन्तरम् 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचे-तिसातिसाहिभ्यश्च' इति सूत्रेण श-प्रत्ययो भवति। ततः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शबागमः। ततः 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण इकारस्थाने एकाररूपगुणादेशे अयादेशे वेदय इति। तदनन्तरं प्रातिपदिकसंज्ञायां स्वादिकार्येण वेदयः इति भवति। चेतयः अपि तथैव भवति।

लिम्पस्तथा विन्द् धातोः अनन्तरं 'नुम्' इत्यस्य निपातनं भवति, अर्थात् शप्रत्ययस्य 'नुम्' निपातनं भवति।'शे मुचादीनाम्' इत्यनेन नुम् श-प्रत्ययस्य अनन्तरं आगच्छति। नुम्-विधानस्य कारणं हि धातोः तुदादिगणीयत्वम्। केवलं तुदादिगणीयानामेव 'शे मुचादीनाम्' इत्यनेन 'नुम्' इति आगमो भवति।

लिप् उपदेहे इति धातोः नुमागमं कृत्वा लिम्प इति भवति। तदनन्तरं 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' इति सूत्रेण श-प्रत्यये, शित्वात् सार्वधातुकसंज्ञायां,धातोः तुदादिगणीयत्वात् 'तुदादिभ्यः शः' इति सूत्रेण पुनः श-प्रत्यये, अनुबन्धलोपे 'अतो गुणे' इत्यनेन पररूपे लिम्प इति सिध्यति। ततःप्रातिपदिकसंज्ञायां स्वादिकार्येण लिम्पः भवति। विन्दः इति पदमपि समेनैव प्रकारेण सिद्धं भवति।

कातन्त्रकारोऽपि 'साधिसाहिसातिचित्युदेजिवेदिधारिपारिलिम्पविन्दां त्वनुपसर्गे' इत्यनेन सूत्रेण शङ्-प्रत्यये, तथा अन्-विकरणे लिम्पः, विन्दः इति पदानां सिद्धिं करोति। अतः वक्तुं शक्यते यत् लिम्पः, विन्दः इति पदानां साधने पाणिनीव्याकरणापेक्षया कातन्त्रव्याकरणे गौरवं दृश्यते। अत्रैव मया सल्पमेव कृतास्ति। इतोऽपि अनेकानि सूत्राणि पदानि च सन्ति।

## उपसंहृतिः

संस्कृतव्याकरणजगति कातन्त्रव्याकरणम् अतीव परिचितग्रन्थोऽस्ति। कातन्त्रव्याकरणं न केवलं भारतवर्षे अपि तु बहिर्देशेऽपि शास्त्रस्यास्य चर्चा प्रचलिता। अतीव सारल्येन प्रणीतमिदंकातन्त्रव्याकरणमिति। तस्माद्धेतोः सर्वेषां कृते ग्रन्थोऽयं उपकारको भवति। व्याकरणस्यास्य बहूनि अभिधानानि प्राप्यन्ते अस्माभिः। यद्यपि कातन्त्रव्याकरणं बहुशः प्रचलितमस्ति, तथापि तत्र पाणिनीव्याकरणेन सह सादृश्यं वैसादृश्यञ्च दृश्यते। कुत्रापि समानता दृश्यते, कुत्रापि च नवीनता। अर्थात् पाणिनीयव्याकरणे यन्न दृश्यते तत् क्वचिद्दृश्यते कातन्त्रव्याकरणे। अतः कातन्त्रव्याकरणं पाणिनीव्याकरणात् भिन्नम् एव वर्तते।

शर्ववर्मा तस्य स्वकीये व्याकरणग्रन्थं लाघवार्थं प्रयोगं कृतवान्। कारणं हि लाघवेन शीघ्रमर्थबोधो भवति। कातन्त्रव्याकरणस्य सूत्रेषु लाघवार्थमेव प्रयासोदृष्टिगोचरो भवति। किन्तु आचार्यपाणिनिः तस्य व्याकरणे यद्यपि लाघवर्थं प्रयासं दर्शयति तथापि अर्थबोधो तावत् शीघ्रं न भवति, यावता द्रुततया कातन्त्रव्याकरणे इति हरिः।

## सहायकग्रन्थपञ्जी

❖ **आकरग्रन्थाः**


- *अष्टाध्यायी-* (सम्पा.) ड. श्री गोपाल शास्त्री, प्रो. गोपालदत्त पाण्डेय, चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१७
- *कातन्त्रव्याकरणम्-* विद्यावाचस्पति प्रो. तिवारी हरिनारायन (हिन्दि व्याख्याकारः एवं सम्पादकः), चौखम्वा कृष्णदास अकादमी, वाराणसी, २०१६
- *कातन्त्रव्याकरणम्* (प्रथमभाग)- (सम्पा.) ड. जानकि प्रसाद द्विवेद, सम्पुर्णानन्दस्स्कृतविश्वविद्यालय, वाराणसी, २०१७
- *गान्धर्वकलापव्याकरणम्-* (सम्पा.) ड. शरच्चन्द्र द्विवेद (हिन्दि अनुवादक सम्पादकश्च), वाराणसी, २००७
- *तघुसिद्धान्तकौमुदी-* (सम्पा.) अध्यापक ड. तपनशङ्कर भट्टाचार्य, संस्कृत वुक डिपो, कलकाता, २०१२
- *निरुक्तम्-* (सम्पा.) व्रह्मचारी मेधाचैतन्य, संस्कृत पुस्तक भाण्डार, कलकाता,
- *निरुक्तम्( प्रथमाध्याय)*- (सम्पा.) ड. तारकनाथ अधिकारि, संस्कृत पुस्तक भाण्डार, कलकाता, २०१२
- *पाणिनीय शब्दशास्त्-* (सम्पा.) ड. सत्यनारायन चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता,२०१२
- *पाणिनीय शिक्षा-* कौण्डिन्न्यायनः शिवराज आचार्य (व्याख्याकार), कौण्डिन्न्यायनः अमोदवर्धन, कौण्डिन्न्यायनः प्रमोदवर्धन, कौण्डिन्न्यायनः सुमोदवर्धन (प्रकाशक), चौखम्वा संस्कृत प्रतिष्ठान, वाराणसी, २०१७
- *महाभाष्य( पस्पशाह्निकम्-,* (सम्पा.) ड. शशिभूशण मिश्र, वि. एन. पाब्लिकेशान, कलकाता, २०१८
- *महाभाष्य (पस्पशाह्निकम्)-* (सम्पा.) ड. जयशङ्करलाल त्रिपाठी, ड. विश्वनाथ भट्टाचार्य (प्रस्तावमनालेखकः), चौखम्वा कृष्णदास अकादमी, वाराणसी, २०१९
- *महाभाष्य* ( *पस्पशाह्निकम्*)- (सम्पा.) ड. गङ्गाधरकर न्यायाचार्य, संस्कृत पुस्तक भाण्डार, कलकाता, २०१७
- *वैयाकरणसिद्धान्तकौमुदी* (प्रथम भाग)- श्रीधरमुखोल्लसिनी (हिन्दिव्याख्यासमन्विता), आचार्य श्री गोविन्द (व्याख्याकार), शर्मा लक्ष्मी (सम्पा.), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१८
- *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनीसहिता, तृतीयभाग)- श्रीमद्गिरिधर शर्मा, श्रीपरमेश्वरानन्द शर्मा (सम्पा.), मतीलाल बनारसीदास, दिल्ली, ?
- *वैयाकरणसिद्धान्तकौमुदी* (षष्ठ भाग)- श्रीधरमुखोल्लसिनी (हिन्दिव्याख्यासमन्विता), आचार्य श्री गोविन्द (व्याख्याकार), शर्मा लक्ष्मी (सम्पा.), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१८
- *व्याकरणमहाभाष्यम्* (षष्ठोऽध्यायः)- (सम्पा.) पि.टि गुरुप्रसाद् शास्त्री, प्रतिभा प्रकाशन्, दिल्लि, १९९९
- *सरस्वतीकण्ठभारम्* (तृतीयाध्यायः)- (सम्पा.) श्री नारायनदण्ड नाथ, PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE, १९३८
- *सिद्धान्तकौमुदी* (कारक प्रकरणम्)- (सम्पा.) ड. सच्चिदानन्द मुखोपाध्याय, साहित्य निकेतन, कलकाता, २०१५
- *सिद्धान्तकौमुदी* (तत्त्ववोधिनीटीका)- (सम्पा.) जयकृष्ण मिश्र भैरव, संस्कृत पुस्तक भाण्डार, १९५९